।। पंचचत्वारिंशोऽध्याय: ।। chapter-45

वसिष्ठ उवाच : ततो गच्छन्नृपश्रेष्ठ लक्ष्मी त्रैलोक्यवंदिताम्।
यस्यादर्शनमात्रेण नर: सिद्धिमवाप्नुयात् ।। १

पुरा त्रेतायुगे राजन् शापाद् दुर्वाससो मुने:
त्रैलोक्यं संपरित्यक्तं श्रिया[1] दु:खाय वज्रिण: ।। २

हरिवक्ष:स्थले लक्ष्मीर्न तदासीन्नरेश्वर: ।।
भीता दुर्वाससो विप्रात्प्रविष्टा क्षीरसागरम्। ३

नि:श्रीकमभवत्सर्वं निरानंदमनुत्तमम्।
गतोत्सवमपस्नेहमतेजस्कमनादरम्। ४

नष्टा यज्ञक्रिया: सर्वा भूतानां बलयस्तथा ।।
विप्रा सीदंति सर्वत्र विष्णोदुरमरास्तत: ।। ५

आराध्य जगतां नाथं देवदेवं गदाधरम्।
उपदेशं तत: प्राप्य ममन्थुर्दुग्धालयम्। ६

तेजसाप्यायता विष्णो: सर्वे देवा: सवासवा: ।।
विदधुर्वासुकिं नेत्रं मन्था[2]ऽभून्मंदराचल: ।। ७

-०-

२ बी मन्थौ
१ ए ( श्रियौ दु:खाय वाज्रिण: )

तेषां प्रमथतामब्धिं हविद्धिभागवांश ।।
निरगाद्वारुणीं पश्चाद्देवो धन्वंतरिस्ततः ।। ८

बिभ्राणो दक्षिणे पाणौ सुधापूर्णं कमंडलुम् ।
बीज्यमानोऽप्सरोभिश्च चामरैः कौमुदीप्रभैः ।। ९

निर्ययौ जगतां माता विष्णोः श्रीः प्राणवल्लभा ।।
ततः प्रमुदिता देवास्तुष्टुवुस्तां महेश्वरीं ।। १०

गंधाढ्यैरर्च्चयामासुर्दिव्यैः पुष्पैः सुरोत्तमाः ।।
नैपथ्यानि ददुः सर्वे देव्यै देवाः सुचेतसः ।। ११

मूर्तिमानथ दुग्धाब्धिर्मालां सांतानिकीं करे ।।
अर्पयामास वै दिव्यां वरस्वेति प्रियं प्रियम् ।। १२

इत्युक्ता सा समुद्रेण समुद्रतनया नृप ।।
विष्णोः कंठे प्रचिक्षेप मालामाकंपितेक्षणा ।। १३

पुष्पवृष्टिरभूद्राजन् गंधर्वासितादिङ्मुखा ।।
ततो दैत्याः सुधापूर्णमादायैव कमंडलुम् ।। १४

-०-

३ बी गन्धाढ्यैर्वर्च्यामासु दिव्यैः डी- ई गन्धाढ्यैरर्च्यामासुः

१ए- गानो
२ ए- चामरे
५ ए कीकिरे
६ ए गंधर्वाष्पितदिङ्मुखा
७ ए ततोदैत्याः
४ ए देव्ये

अपसर्प्य मुदायुक्ता: पातुं पीयूषमुद्यता: ।।
ततो देवगणा: सर्वे प्रणम्योचुर्जनार्दनम् ।। १५

देवदेव जगन्नाथ शंखचक्रगदाधर ।।
त्राहि न: शरणं प्राप्तान् दैत्येभ्यो मृतमानय ।। १६

अथ विष्णु: स्त्रियो रूपमद्भुतं विश्वमोहनम् ।
विधाय मोहयामास दैतेयानल्पचेतस: ।। १७

तां दृष्ट्वा सुदतीं सुभ्रूं पीनोन्नतपयोधराम् ।।
हित्वा भूमौ सुधां सर्वे पर्यधावन् जिघृक्षया ।। १८

गृहीत्वाथ सुधापूर्णममरास्तं कमण्डलुम् ।
पपु: प्रमुदिता: स्वैरं विष्णोर्युक्त्या सवासवा: ।। १९

ततो देवै: पराभूता दैतेया: शतशो नृप ।।
भ्रान्ता दश दिशो जग्मु: श्येनपाताद्विवाण्डजा: ।। २०

देवेष्वथ सुहृष्टेषु लक्ष्मीं स्वीकृत्य केशव: ।।
क्षीरोदधिमिदं प्राह परिपुष्ट: सहामरै: ।। २१

-०-

३ बी पपु: प्रमुदिता: स्वैरममरास्तेन ते भवन्
५ बी हरिस्तुष्ट:
१ ए मुदा
२ ए पीयुष
४ परभूता

देवैः प्राप्तानि रत्नानि त्वया दत्तानि वारिधे ।।
निर्जिता रिपवः सर्वे पीतं चामृतमुत्तमं ।। २२

श्रीरवाप्य च मां देवी कृतार्थमकरोज्जगत् ।।
तेन तुष्टोऽस्मि तेऽवाहं वरं वृणु महोदधे ।। २३

महोदधिरुवाच :- इयं सर्वावतारेषु लक्ष्मीर्विष्णोः सहायिनी ।।
न वैतानि[1] च रत्नानि सर्वे वैत्वन्मयं जगत् ।। २४

उषित्वामद्गृहे[2] लक्ष्मीः दुहितत्वमुपागता ।।
श्रेयसे मम तेनास्या विष्णो पाणिग्रहं कुरू ।। २५

दत्तास्यादनुरूपाय येन कन्या वरायवे[3] ।।
तेन दत्ता मही सर्वा सशैलवनकानना ।। २६

अनेन श्रेयसायुक्त्व श्रीपाणिग्रहणेन मां[4] ।।
यदि तुष्टोसि देवेश शंखचक्रगदाधर ।। २७

भगवानुवाच :- विहितस्य विधिर्लोके न भूयः स्यान्महोदधे ।।
किंतु त्वत्प्रीणानार्थाय कर्तास्मि श्रीकरग्रहं ।। २८

-०-

१ बी उषित्वा मदगृहे देवी, घ-ई उत्पन्ना मग्दृहे मत्वा
२ ए उषित्वान्देह लक्ष्मी   १अ ए नवैतानीव
३ ए यवे
४ ए ग्रहजेनमा

उद्धृता जलधिक्रीडा सह रत्नैरियं मया ।।
देवी विश्वोपकाराय देवतानां हिताय च ।। २९

तस्मादुद्धृत्यपाणिभ्यां समिद्धस्य विभावसो : ।।
प्रदक्षिणाः प्रदास्यामि निर्मंत्रा: श्रेयसे तव ।। ३०

महोदधिरुवाच :- एवमस्तु जगन्नाथ देवदेव सनातन ।।
श्री: सुता त्वं च जामाता कोऽस्ति धन्यतरो भुवि[1] ।।३१

वसिष्ठ उवाच :- इति दत्वा वरं देव: श्रीपति[2]: सरितां प्रभो: ।।
लक्ष्मीमादाय पर्यंके प्रययौ गरुडध्वज: ।। ३२

व्योमांगणमतिक्रम्य श्रीमालं चाक्रमायथौ ।।
पराशरो भृगुर्दालिभ्यश्च्[3]यवनो गालव: क्रतु: ।। ३३

भरद्वाज: शतानंदो रैभ्यो गर्गोथ देवल: ।।
सार्धमन्यैर्द्विजै: सर्वे महात्मानस्तपोधना: ।। ३४

अभ्युत्थानाय संप्राप्ता देव्यै श्रीमालवासिन: ।।
प्रजापतिं पुरस्कृत्य कश्यपं ते महर्षय: ।। ३५

-०-

२ बी श्रीपितु:

१ ए भूवि

३ ए यश्चय

अर्घ्यं चक्रुर्मुकुंदायासिद्धैरन्यैः समन्विता:[1] ॥
हर्षाश्रुपूर्णनयना: स्फुरद्रोमांचकंचुका: ॥ ३६

आदित्या वसवो रुद्रा: सिद्धा: साध्या मरुद्गणा: ॥
गंधर्वा: किन्नरा यक्षास्तथा चाप्सरसां गणा: ॥ ३७

ब्रह्म ब्रह्मर्षयः सर्वे स्तुवंतो गरुडध्वजं ॥
प्रेरितो ब्राह्मणै: सर्वै देवीं प्रोवाच कश्यपः ॥ ३८

इदं क्षेत्रमितो देवि श्रीमालं निर्मितं भुवि ॥
भवत्या विष्णुना चैव ब्राह्मणेभ्यः समर्पितः ॥ ३९

अत्र तीर्थानि पुण्यानि देवतायतनानि च ॥
संश्रयात्तव देवेशि स्थितिं कुर्वंति मान्यथा ॥ ४०

त्वयि दुर्वाससः शापाद्गतायां भुवनत्रयात् ॥
प्राणान् धारयन्ति स्म कृच्छ्रादेते देवि द्विजोत्तमा: ॥ ४१

१ बी अर्घ्यं चक्रुर्मुकुन्दाय सिद्धैरन्यैश्च यत्नतः ॥

देव्युवाच :- श्रीमालेहं निवत्स्यामि श्रीमालं दयितं मम ।।
श्रीमाले ये निवत्स्यंति ते भविष्यंति मत्प्रिया: ।। ४२

इत्युक्त्वा सा तदा देवी लक्ष्मी: श्रीमालवत्सला ।।
तत्र पाणिग्रहाथाय मधुद्विषमनूनुदत् ।। ४३

आज्ञया देवदेवस्य सुसमिद्धं हुताशनम् ।।
चकार कश्यपो विद्वान् मंत्रपूतेन सर्पिषा ।। ४४

देवदुंदुभयो नेदुस्तथा शंखा: सहस्त्रश: ।।
ननृतुश्चाप्सर: श्रेष्ठा गंधर्वाश्च जगु: कलम् ।। ४५

लक्ष्मीमुद्धृत्यपाणिभ्यां श्रीपतिर्जगतां प्रभु: ।।
चकार पुरतो वन्हेश्चतस्त्रो वै प्रदक्षिणा: ।। ४६

सर्वरत्ननिधि देव: सर्वभूतनिकेतन: ।।
श्रिय: पितामहांभोधिरनेन प्रीयतामिति ।। ४७

ब्रह्मघोषेण महता नादयंतो वसुंधराम् ।।
तत्र देवं च देवीं च विप्रा: सिषिचुरक्षतै: ।। ४८

-o-

अथ विष्णुः प्रमुदितो मालामादाय कंठतः ॥
देव्यै ददौ यथाभीष्टं मुनीनामर्प्यतामिति ॥ ४९

ततो देवी स्रजं दिव्यां कश्यपाय ददौ मुदा ॥
रत्नैश्च तपनीयैश्च वासोभिः स्वर्गसंभवैः ॥ ५०

प्रीणितास्ते मुकुंदेन द्विजाः श्रीमालवासिनः ॥
रत्नैरलंकृतं सर्वं विचित्रैस्तोरणैस्तथा ॥ ५१

श्रीमालं श्रीसमाकीर्णमधिकं शुशुभे तदा ॥
अथ सर्वे द्विजन्मानः कश्यपप्रमुखाः श्रियम् ॥ ५२

जगन्मातरमित्यूचुर्बद्धांजलिपुटा नृप ॥
प्रीतास्तव महात्मानः सर्वे देवि द्विजोत्तमाः ॥ ५३

प्रियं[1] किमिह कुर्वंतु समाचक्ष्व शुचिस्मिते ॥
देव्युवाच :- एताः करग्रहादूर्ध्वं कन्यामुद्धृत्य सत्तमाः ॥
देवास्तु परितोषन्दै सर्वस्त्रीः वै प्रदक्षिणाः ॥ ५४

--०--

१ बी प्रियम्

मामुधृत्य यथा दोर्भ्या[1] कृतवान् गरुडध्वज: ।।
अद्यप्रभृति कर्त्तव्यं तथैव प्रीतये द्विजा: ।। ५५

पुष्पमाला मया कंठे कश्यपस्य निवेशिता ।।
त्रेतादौ पुष्पमालेति नाम्ना श्रीमालमस्त्विति ।। ५६

अत्र मामर्चयिष्यंतिं पुष्पमाले च ये नरा ।।
तेभ्य: प्रीता प्रदास्यामि सर्वान् कामान् यथेप्सितान् ५७

ब्राह्मणा ऊचु: एवं देवि करिष्याम: श्रीमाले यद्धितं तव ।।
त्वमंबा जाता चैव पिता विष्णु: सनातन: ।। ५८

इह स्थिता सदा देवि त्वामाराध्य हरिप्रिये।
विष्णुलोकाय यास्यंति नरा: पापान्यपास्य वै ।। ५९

विष्णुरुवाच :- य: परिक्रमणं वन्हेश्चतुर्धा वै करिष्यति ।।
कन्यामुधृत्य पाणिभ्यां श्रीमाले द्विजसत्तमा: ।।
तस्य पूर्वेण पाथोधि: प्रीतो भवति निश्चितम्। ६०

१ ए तथाता

द्वितीयेन[1] महालक्ष्मीस्तृतीयेनाहमच्युत: ।।
चतुर्थेन जगत्स्वामी तस्मात्कार्यमिदं बुधै: ।। ६१

त्रैलोक्याच्च[2] गता लक्ष्मी: प्रविष्टा क्षीरसागरं ।
आनीता[3] तु मयोद्धृत्य हिताय जगतां द्विजा: ।। ६२

उद्वाहिता भृगो: पूर्वमाश्रमे श्रीर्मया सती ।।
क्षीराब्धिप्रीतये भूय: परिक्रान्तो हुताशन: ।। ६३

तत: श्रीमालिभि: कार्यो विवाहादूर्ध्वमाहुतै: ।।
कन्यामुद्धृत्यपाणिभ्यां भूयोवन्हे: प्रदक्षिणा: ।। ६४

कश्यपाय महालक्ष्मी पुष्पमालामिमां ददौ ।।
तेनैतत्पुष्पमालेतिनाम्ना ख्यातं भविष्यति ।। ६५

इदं य: श्रृणुयान्नित्यं पुनश्चागमनं श्रिया: ।।
यश: कीर्तिस्तथारोग्यं सदा तस्य न संशय: ।। ६६

वसिष्ठ उवाच :- इत्युक्त्वान्तर्हितो देव: श्रिया सह चतुर्भुज: ।।
तत्रांशेन स्थिता देवी हृष्टमासीज्जगत्त्रयम् ।। ६७

-०-

२ बी त्रैलोक्यात् प्रगतौ
१ ए ति
३ ए आनिता

ततः प्रभृति भूपाल जनाः श्रीमालवासिनः ॥
भूयः कन्यां समुद्धृत्य परिक्रामन्ति पावकम् ॥ ६८

एतत्ते कथितं राजन् देवीमाहात्म्यमुत्तमम् ॥
श्रुत्वा यन्मानवो भक्त्या अग्निष्टोमफलं लभेत् ॥ ६९

कृत्वाप्लिलयाहृदे स्नानं यः पश्यति हरिप्रियाम् ॥
जन्मान्तरशतं यावत्तस्य न श्रीः पराङमुखी ॥ ७०

-०-

इति श्री स्कंद पुराणे इ० देवी महात्म्यं नाम पंचचत्वारिंशोऽ-
ध्यायः ॥ ४५ ॥

१ बी भवेत्